# हरिवंशं – भविष्यपर्वं
## नीलकण्ठव्याख्यानसमेतं
## अथ नवमोऽध्यायः
## एकार्णवे भगवन्मार्कण्डेयसंवादः

वैशम्पायन उवाच

**एवमेकार्णवीभूते शेते लोके महाश्रुतिः ।**
**प्रच्छाद्य सलिलं सर्वं हरिर्नारायणः प्रभुः ॥ ३-१०-१**

यन्नारूपक्रतो योगमुक्त्वा तुर्यं निगद्यते ।
मार्कण्डेय समाधिश्च तद्विप्रेषु निदर्शनम् ॥ १

एवमिति। लोके शुद्धचिदात्मनि महाश्रुतिर्महायशाः ईशः सलिलकार्यं जगत्प्रच्छाद्य उपसंहृत्य शेते शुद्धचिन्मात्ररूपेणावतिष्ठत इत्यर्थः ॥

**महतो रजसो मध्ये महार्णवसमस्य वै ।**
**विरजस्को महाबाहुरक्षरं ब्रह्म यं विदुः ॥ ३-१०-२**

एतदुपपादयितुं ब्रह्मण एव बन्धप्रसक्तिमाह - महत इत्यादिना ॥ रजसः रजोगुणकार्यकर्मफलभूउतस्य देहेन्द्रियादेर्मध्ये दुर्लंघ्यत्वान् महार्णवसमस्य विरजस्को देहादिधर्मास्पर्शी महान्तौ बाहु इव बाहु अक्षरब्रह्माख्यौ प्रणवतत्त्वमसिवाक्यरूपौ उपास्तिक्रियाप्रत्यक्ततत्त्वसाक्षात्काराभ्यां जगदुद्धारक्षमौ विद्येते यस्य तथा ॥

**आत्मरूपप्रकाशेन तपसा संवृतः प्रभुः ।**
**त्रिकमास्थाय कालं तु ततः सुष्वाप सोऽव्ययः ॥ ३-१०-३**

आत्मेति॥ यं परं ब्रह्म विदुः सः समुद्रः परमात्मा सुष्वाप स्वरूपं विस्मृतवानिति संबन्धः। तत्र हेतुः । तपसा आलोचनेन मनोरथात्मकेन संवृतः तिरोहिताङ्गरूपः। कीदृशेन तपसा

आत्मरूपप्रकाशेन चैतन्याभासेन | अत एव त्रिकं भूतभविष्यद्वर्तमानरूपेण त्रिविधं कालं आस्थाय अधिष्ठाय सुष्वाप |

**पुरुषो यज्ञ इत्येवं यत्परं परिकीर्तितम् ।**
**यच्चान्यत्पुरुषाख्यं स्यात्सर्वं तत्पुरुषोत्तमः ॥ ३-१०-४**

एवं प्रभोरेव बन्धप्रसक्तिं प्रदर्श्य तन्निवृत्त्युपायं योगं यज्ञरूपकेण विधित्सुस्तत्प्राप्यं वस्त्वाह - पुरुषो यज्ञ इति | पुरुष इव पुरुषः शिरःपाण्यादिरूपकः यज्ञो योगयज्ञप्राप्यः - *यत्पुरुषाख्यं परं कीर्तितं सः उत्तमः पुरुषः* - इत्यादि श्रुतिषु यच्चान्यद्वियदादि पुरुषेण चिदात्मनैव ख्यायते प्रकाशयते तत्सर्वं पुरुषोत्तमः | चिन्मात्रमेव तत्राध्यस्तस्यान्यस्य तदनन्यत्वादीत्यर्थः ||

**ये च यज्ञपरा विप्रा ऋत्विजा इति संज्ञिताः ।**
**आत्मदेहात्पुराभूता यज्ञेभ्यः श्रूयतां तदा ॥ ३-१०-५**

एवं प्राप्यमुक्त्वा प्रापकमाह ये चेति | यज्ञपरब्रह्मनिष्ठाः विप्रा इव विप्राः रागादि शुन्याः ऋत्विजः ऋतौ कालात्मनि परस्मिन् यजन्ते संगतिं कुर्वते ऋत्विजास्त आदयः | यजे संगतिकरणार्थात् | आत्मदेहात् | चित्पुरुषात् पराभूताः | अनादौ सम्सारे पुर्वसिद्धाः यज्ञेभ्यः यज्ञार्थमेव भूताः | न पश्वादिसाधारणविषयभोगार्थं यथैतत्तथा श्रूयतां मत इति शेषः ||

**ब्रह्माणं परमं वक्त्रादुद्गातारं च सामगम् ।**
**होतारमथ चाध्वर्युं बाहुभ्यामसृजत्प्रभुः ॥ ३-१०-६**

योगयज्ञार्हानृत्विजः प्रस्तौति - ब्रह्माणमिति | अत्र काठके - *विश्वसृजां सत्रे ब्रह्म ब्रह्माभवत् स्वयं* | *अमृतमेव उद्गायत्* इति | ब्रह्मामृतशब्दाभ्यां वेदतदर्थो उच्येते | तत्र परममिति विशेषणादुपनिषदे एव ब्रह्म तत्साध्या वृत्तिरमृतसाधनत्वादमृतम् ते उभे ब्रह्मोद्गातृशब्दाभ्यामिहोक्ते | वक्त्रप्रभवत्वेन च तयोरन्तरङ्गत्वमुक्तम् | *होत्रध्वर्युसत्य*ॅ

*ह होतैषामसीत्प्राणो अध्वर्युरभवत्* इति श्रुत्युक्तौ सत्यप्राणौ ताभ्यां सत्योक्तिप्राणजयौ वक्त्रजावपि तदुपकारतया किंचिद्बहिरङ्गौ । एवमुत्तरत्र अक्षरयोजना स्पष्टा । ब्रह्मादि चतुष्टयं वक्त्रादसृजतित्युक्त्वा ब्राह्मणाच्छंस्यादि चतुष्कं बाहुभ्यामसृजदित्याह बाहुभ्यामित्यादि सपादश्लोक एकं वाक्यम् ॥

**ब्राह्मणो ब्राह्मणत्वाच्च संप्रस्तारं च सर्वशः ।**
**तन्मित्रं वरुणं सृष्ट्वा प्रतिष्ठातारमेव च ॥ ३-१०-७**

ब्राह्मणत्वाद्ब्रह्म वेदस्तदध्येतृत्वात् ब्राह्मणो ब्राह्मणाच्छंसी नाम संप्रस्तारं प्रस्तोतारं तन्मित्रं वरुणं मैत्रावरुणसंज्ञं प्रशस्तारं प्रतिष्ठातारं प्रतिप्रस्थातारं एतैः । *अश२ँ स ब्रह्मणस्तेजः भूत२ँ स प्रस्तौतैषामासीत् ऋतमेषां प्रशास्तासीत् अपानो विद्वानावृतः प्रतिप्रातिष्ठदध्वरः* इति श्रुत्युक्तास्ते तेजोभूत ऋतापानाख्यो धीबलपुर्वस्मृतिस्वधर्माचरण जयानुकुलापानाख्य मुलबन्धा विहिता ज्ञेयाः ।

**उदरात्प्रतिहर्तारं पोतारं चैव भारत ।**
**अच्छावाकमनोरूभ्यां नेष्टारं चैव भारत ॥ ३-१०-८**

*प्रतिहर्तृपोत्रच्छावाकेनेष्टशब्दैः भविष्यत्प्रति चाहरत् अपचितिः पोत्रीयामयजत् अच्छावको भवद्यशः नेष्त्रीयामयजत्त्विषिः* इति श्रुत्युक्तेषु भविष्यत् भाव्यनुसंधानं अपचितिर्देवतातिथि पुजनं यशः यशस्करमिति वदान्यत्वादि त्विषिस्तपस्तेजः ॥

**पाणिभ्यामथ चाग्नीध्रं सुब्रह्मण्यं च यज्ञियम् ।**
**ग्रावाणमथ बाहुभ्यामुन्नेतारं च यज्ञियम् ॥ ३-१०-९**

तथा आग्नीध्रसुब्राह्मण्यग्रावशब्दोक्तग्रावस्तुदुर्नेतृशब्दैः *आग्नीध्रादिविदुषिसत्यं श्रद्धा हैवायजत्स्वयं वागेषां तु ब्रह्मण्यासीत् ओजोभ्यष्टोद्ग्राव्णः उर्जानमुदवहत्* इति श्रुत्युक्तेषु विदुषी शास्त्रार्थोपबृंहिका ऊहपोहकौशलवती श्रद्धा वाक् स्वाध्यायप्रवचने ओज इन्द्रियजये शौर्यम् ऊर्क् योगाङ्गानामुर्जितिरित्येते ग्राह्याः । यज्ञेति - ब्रह्मा ॥ १ ॥ उद्गाता ॥ २ ॥ होता ॥ ३

॥ अध्वर्युः ॥ ४ ॥ ब्राह्मणाच्छंसी ॥ ५ ॥ प्रस्तोता ॥ ६ ॥ मैत्रावरुणः ॥ ७ ॥ प्रतिप्रस्थाता ॥ ८ ॥ प्रतिहर्ता ॥ ९ ॥ पोता ॥ १० ॥ अच्छावाकः ॥ ११ ॥ नेष्टा ॥ १२ ॥ आग्नीध्र ॥ १३ ॥ सुब्रह्मण्यः ॥ १४ ॥ ग्रावस्तोता ॥ १५ ॥ उन्नेता ॥ १६ ॥ एते ऋत्विजः । एते योगे यथाक्रमं - प्रणवः ॥ १॥ तदर्थभावनम् ॥ २ ॥ सत्योक्तिः ॥ ३ ॥ प्राणजयः ॥ ४ ॥ धीतैक्ष्ण्यम् ॥ ५ ॥ पुर्वस्मृतिः ॥ ६ ॥ आचारः ॥ ७ ॥ अपानजयः ॥ ८ ॥ भाविदुःखचिन्ता ॥ ९ ॥ ईशपुजा ॥ १० ॥ दानम् ॥ ११ ॥ योगोत्साहः ॥ १२ ॥ सात्त्विकी श्रद्धा ॥ १३ ॥ वेदान्तश्रवणम् ॥ १४ ॥ इन्द्रियशौर्यम् ॥ १५ ॥ योगाङ्गानामुर्जिति ॥ १६ ॥ च लक्ष्यन्ते ॥

**एवमेवैष भगवान्षोडशैताञ्जगत्पतिः ।**
**प्रवक्तृन् सर्वयज्ञानामृत्विजोऽसृजदुत्तमान् ॥ ३-१०-१०**

एवमिति | एतानुपनिषदादीन् सर्वयज्ञानां चत्वारः सबीजयोगाः पञ्चमो निर्बीजश्च वक्ष्यमाणास्तेषां सर्वेषां योगयज्ञानां प्रवक्तृन् प्रापकान् वज गतौ इत्यस्मात्तृच् |

**तदेष वै वेदमयः पुरुषो यज्ञसंमितः ।**
**वेदाश्च तन्मयाः सर्वे साङ्गोपनिषदक्रियाः ॥ ३-१०-११**

तदेष इति || स एष ऋत्विक् स्रष्टा भगवान् वेदमयो वेदप्रधानो वेदैकगम्यः | *नावेदविन्मनुते तं बृहन्तम्* इति श्रुतेः पुरुषः परमात्मा यज्ञेन योगेन सम्यक् मितः प्रमितोपरोक्षी | कृत यज्ञसंमितः वेदाश्च तन्मयाः तस्यैव प्रतिपादकाः क्रियाश्च तन्मयास्तत्प्रापका इत्यनुषज्य योज्यम् ||

**स्वपित्येकार्णवे चैव यदाश्चर्यमभूत्तदा ।**
**श्रुयते तदयथा वृत्तं मार्कण्डेयो यदन्वभूत् ॥ ३-१०-१२**

एवमुक्तसाधनकलापविशिष्टो योगी यथा एकार्णवे चिन्मात्रे स्वपिति प्रवेष्टुं यतते तदाश्चर्यम् अभूत् भवति | तत् विश्वरूपदर्शनातीतान् आगतादिदर्शनं चेत्यादि श्रूयते | *वेद सर्वं ह पश्यः पश्यति यच्चान्यदिच्छन्न लभते तदत्र गत्वा विन्दते* इत्यादौ |

अत्राख्यायिकामाह - तद्यथावृत्तमित्यादीना ||

**जीर्णो भगवतस्तस्य कुक्षावेव महामुनिः ।**
**बहुवर्षसहस्रायुस्तस्यैव वरतेजसा ३-१०-१३**

जीर्णः सर्वोपाधिप्रहाणेन प्रविलीनः | मार्कण्डेयं स्तौति सार्धद्वयेन बह्विति ||

**इति तीर्थप्रसङ्गेन प्रिथिवीतीर्थगोचरः ।**
**आश्रमानपि पुण्यांश्च तीर्थान्यायतनानि च ॥ ३-१०-१४**

इति वक्ष्यमाणप्रकारेण तीर्थनिमित्तमेव सर्वतीर्थदर्शी न दक्षिणाद्यर्थमित्यर्थः | आश्रमानित्यादीनां समाश्रितः इत्यनेन संबन्धः ||

**देशान् राष्ट्राणि चित्राणि पुराणि विविधानि च ।**
**जपहोमरतः क्षान्तस्तपो घोरं समाश्रितः ॥ ३-१०-१५**

**मार्कण्डेयस्ततस्तस्य शनैर्वक्त्राद्विनिःसृतः ।**
**निष्क्रामन्तं न चात्मानं जानीते देवमायया ॥ ३-१०-१६**

एवं चिन्मात्रे लीनोऽपि मार्कण्डेयः पुनर्विना व्युत्थानसंकल्पसुप्तवत्समाधेर्व्युधतिष्ठदित्याह - मार्कण्डेय इति | वक्त्रात्स्वलयस्थानात् ||

**निष्क्रान्तस्तस्य वदनादेकार्णवमथो गतः ।**
**सर्वतस्तमसाच्छन्नं मार्कण्डेयो निरीक्षते ॥ ३-१०-१७**

एवं व्युत्थितोऽपि अथो पुनः एकार्णवं चिन्मात्रं गतः प्रवेष्टुं प्रयत्नं कृतवान् | तं च तमसा अज्ञानेनावरणविक्षेपशक्तिमता आच्छन्नं निरीक्षते | अयं भावः - चित्तसत्त्वं

तत्त्वे प्रणिधित्सदपि तत्त्वस्य तमसा पिहितत्वात्तत्र विक्षेपरूपम् ऐश्वर्यमेवावेक्षितवान् रज्ज्वामिव सर्पमिति ||

**तस्योत्पन्नं भयं तीव्रं संशयश्चात्मजीविते ।**
**देवदर्शनसंहृष्टो विस्मयं चागमत्परम् ॥ ३-१०-१८**

भयं द्वैतदर्शनजम् | *द्वितीयाद्वै भयं भवति* इति श्रुतेः | आत्मजीविते स्वरूपस्थैर्ये किं निर्विशेषमेव स्वरूपं नित्यमुत सविशेषमिति संशयश्चोत्पन्नः | संशयच्छेदं विवेकबलेनेव कृतवानित्याह - देवेति | देवदर्शनं शुद्धसक्षात्कारः तेन सम्हृष्टः प्राप्तानन्दः विस्मयं परं चागमत् | कारणाभावेऽप्याकस्मिकीमन्तः सृष्टिं दृष्ट्वेति भावः ||

**सञ्चिन्तयति मध्यस्थो मार्कण्डेयोऽतिशङ्कितः ।**
**किंस्विद्भवेदियं चिन्ता मोहः स्वप्नोऽनुभूयते ॥ ३-१०-१९**

विवेकमेवाह - सञ्चिन्तयतीति |मध्यस्थः निर्विशेषान्यतरनिर्णयहीनः चिन्ता मनोरथः मोह इन्द्रजालादिजो भ्रमः स्वप्नः प्रसिद्धः ||

**व्यक्तमन्यतमो भावो ह्येतेषां भविता मम ।**
**न हीदृशमसंक्लिष्टमयुक्तं सत्यमर्हति ॥ ३-१०-२०**

एतेषामन्यतमोऽयं भावो मनोविकारो न वस्तुतत्त्वमित्यर्थः | तस्यैवासंभवमाह - न हीति | सत्यं पारमार्थिकं अयुक्तम् असङ्गि असंक्लिष्टम् अविद्यादिसंक्लेशशुन्यम् सत् ईदृशं मनोरथादिरूपं भवितुमर्हसि ||
a **नष्टचन्द्रार्कपवने छन्नपर्वतभूतले ।**
**कतमः स्यादयं लोक इति चिन्ताव्यवस्थितः ॥ ३-१०-२१**

तत्र हेतुमाह - नष्टेति महाभूतानां नाशोऽपि भासमानस्य चिन्तादिष्वन्यतमत्वस्यैव संभवास्क्तमो लोकोऽयमिति चिन्तितवान् ||

**अपश्यच्चापि पुरुषं शयानं पर्वतोपमम् ।**
**तोयाढ्यमिव जीमुतं मध्ये मग्नं महार्णवे ॥ ३-१०-२२**

स एवं तत्त्वनिश्चयाभावात् संदेहनिवृत्तिं कामयमानः स्वाराध्यां कारणोपाध्यभिमानिनीं देवतामपश्यत् । तया च प्रतिबोधितः कृतकृत्यो बभूवेत्याह - अपश्यदित्यादिना । तोयाढ्यमिति कृष्णत्वं सुचितम् । महार्णवे परमानन्दे ॥

**तपन्तमिव तेजोभिर्भास्वन्तमिव वर्चसा ।**
**जाग्रन्तमिव गाम्भीर्याच्छ्वसन्तमिव पन्नगम् ॥ ३-१०-२३**

जाग्रन्तमित्यार्षो नुम् ॥

**स देवं प्रष्टुमायाति को भवानिति विस्मयात् ।**
**तथैव च शनैर्भूयो मुनिः कुक्षिं प्रवेशितः ॥ ३-१०-२४**

पुनः पुर्वत्चिन्मात्रत्वं प्राप्त इत्याह - स देवमिति ॥

**स प्रविष्टः पुनः कुक्षौ मार्कण्डेयः सुनिश्चितः ।**
**तथैव चरते भूयो विजानन्स्वप्नदर्शनम् ॥ ३-१०-२५**

स एवं भूतश्चिन्मात्रत्वमेवात्मतत्त्वं द्वैतं तु स्वप्नमात्रमिति संप्रज्ञातमेव निश्चितवानित्याह - संप्रविष्ट इति ॥

**स तथैव यथापुर्वम् पृथिवीमटते पुनः ।**
**पुण्यतीर्थानि पुतानि निरैक्षद्दिवि भूतले ॥ ३-१०-२६**

स तथैवेति - यथा व्युत्थाने तथैव संप्रज्ञाने घटनादिकं कृतवानित्यर्थः ||

**क्रतुभिर्यजमानांश्च समाप्तवरदक्षिणैः ।**
**पश्यते देवकुक्षिस्थान्यज्ञीयञ्छतशो द्विजान् ॥ ३-१०-२७**

देवकुक्षिस्थान् हार्दाकाशस्थान् ईक्ष्यते इति शेषः ||

**सद्वृत्तमाश्रिताः सर्वे वर्णा ब्राह्मणपूर्वकाः ।**
**चत्वारश्चाश्रमाः सम्यग्यथोद्दिष्टपदानुगाः ॥ ३-१०-२८**

**वर्षाणां शतसाहस्त्र्यं मार्कण्डेयो महामुनिः ।**
**विचरन् पृथिवीं कृत्स्नां न च कुक्ष्यन्तमैक्षत ॥ ३-१०-२९**

**ततः कदाचिदथ वै पुनर्वक्त्राद्विनिःसृतः**
**सुप्तं न्यग्रोधशाखायां बालमेकं निरीक्षते ३-१०-३०**

तत्त्वविश्चयस्य दुःसंपादकत्वं वक्तुं पुनर्मार्कण्डेयस्य मोहमाह - ततः कदाचिदिति | वक्त्रान्निःसृत समाधेर्व्युत्थितः |न्यग्रोधशाखायां न्यक् नीचैः रोहतीति न्यग्रोधः स्थुलः संसारवृक्षः |उर्ध्वमुलमधः शाखमित्युक्तेः |तस्यां शाखायां एकदेशे सुप्तमनाविष्कृतैश्वर्यं शान्तं बालम् स्वाराध्यमीशं चिन्तयते कस्मिन्सति ||

**यथा चैकार्णवजले नीहारेण वृतान्तरे ।**
**अव्यक्तभीषणे लोके सर्वभूतविवर्जिते ॥ ३-१०-३१**

यथा चेति | स्रष्टा चेत्यर्थः | एकार्णवजले शुद्धज्ञानसामर्थ्ये नीहारेणाज्ञानेन पुर्ववत्तिरोहिते सति तथा लोके अपि भूतविवर्जिते चतुर्विधभूतग्रामशुन्ये | अत एवाव्यक्ते भीषणे च द्वितीयाभावात् तस्मादेकाकी बिभेतीत्यविद्यावस्तायामेकाकिनं प्रति भयजनके सति

भगवान् गुर्वादिरूपेणाविर्भूय भक्ताननुगृह्णातित्याह - स भूय इतादिना ||

**स भूयो विस्मयाविष्टः कौतुहलसमन्वितः ।**
**बालमादित्यसङ्काशं न शक्नोत्युपसर्पितुम् ॥ ३-१०-३२**

विस्मयाविष्टः समाधौ कृत्नस्य व्यावहरिकस्य तीर्थक्षेत्रादेर्दर्शनं व्युत्थाने तद्दर्शनमिति विस्मयाविष्टः दिव्यैकाकिबालदर्शनाच्च कौतुहलसमन्वितः ||

**सोऽचिन्तयदथैकान्ते स्थित्वा सलिलसन्निधौ ।**
**पुर्वदृष्टमिदं नेति शङ्कितो देवमायया ॥ ३-१०-३३**

सोऽचिन्तयदित्यादिः स्पष्टार्थो ग्रन्थः |

**अगाधे सलिलस्तब्धे मार्कण्डेयः प्लवन्मुनिः ।**
**न शान्तिं लभते तत्र श्रमात्संत्रस्तविक्लवः ॥ ३-१०-३४**

**तथैव भगवान्हंसो गतो योगेन बालताम् ।**
**बभाषे मेघतुल्येन स्वरेण पुरुषोत्तमः ॥ ३-१०-३५**

श्रीभगवानुवाच

**मा भैर्वत्स न भेतव्यमिहैवायाहि चान्तिकम् ।**
**मार्कण्डेय मुने धीर बालस्त्वं श्रमपीडितः ॥ ३-१०-३६**

मार्कण्डेय उवाच

**को मां नाम्ना कीर्तयते तपः परिभवन्मम ।**

बहुवर्षसहस्रायुर्धर्षयंश्चैव मे वयः ॥ ३-१०-३७

न ह्येषु समुदाचारो देवेष्वपि समाहितः ।
मां ब्रह्मापि स विश्वेशो दीर्घायुरिति भाषते ॥ ३-१०-३८

कस्तपो घोरशिरसो ममाद्य त्यक्तजीवितः ।
मार्कण्डेयेति मां प्रोक्त्वा मृत्युमीक्षितुमिच्छति ॥ ३-१०-३९

क इति | तपः परिभवन्निति शेषः ||

वैशम्पायन उवाच

एवमाभाषते क्रोधान्मार्कण्डेयो महामुनिः ।
अथैनं भगवान्भूयो बभाषे तत्परायणम् ॥ ३-१०-४०

श्रीभगवानुवाच

अहं ते जनको वत्स हृषीकेशः पिता गुरुः ।
आयुःप्रदाता पौराणः किमर्थं नोपसर्पति ॥ ३-१०-४१

एवं वयस्तपोभ्यां वृद्धमन्यम् ऐक्यात्मं बुबोधयिषया तस्य गर्वं तावदपनेष्यन् श्रीभगवानुवाच - अहं ते जनक इत्यादि | नोपसर्पति भवान् मामिति शेषः |

मां पुत्रकामः प्रथमं पिता ते ह्यङ्गिरा मुनिः ।
पुर्वमाराधयामास तपस्तीव्रमुपाश्रितः ॥ ३-१०-४२

आङ्गिरा हिरण्यगर्भः | *एतं नु एवाङ्गिरसं मन्यन्तेऽङ्गानां हि रसस्तेन* इति श्रुत्या विश्वपितरि तैजसेऽङ्गिरःशब्दवृत्तेर्दर्शितत्वात् ||

ततस्त्वां घोरशिरसं दहनोपमतेजसम् ।

**दत्तवानहमात्मेष्टं महर्षिममितायुषम् ॥ ३-१०-४३**

घोरशिरसं नाम्ना | मार्कण्डेय इति तु मृकण्डोरपत्यत्वान्नाम ||

**तत्र नोत्सहते चान्यो यो न भूतो ममात्मकः ।**
**द्रष्टुमेकार्णवगतं क्रीडन्तं योगधर्मिणम् ॥ ३-१०-४४**

तत्र आवयोर्जन्यजनकभावे संबन्धे सति यो ममात्मको मदभिन्नो न भूतः सोऽन्योऽचेतनतवात् एकार्णवगतं योगधर्मिणं मां द्रष्टुं नोत्सहत इति योजना | अयं भाव - जडाजडौ द्वौ पदार्थौ तत्र जडो नाजडं द्रष्टुमिष्टे नाप्यजडो जडादन्यं तस्यापि दृश्यत्वेन जडत्वापत्तेरत आवयोरैकात्म्यं निश्चितमिति ||

वैशम्पायन उवाच

**ततः प्रसन्नवदनो विस्मयोत्फुल्ललोचनः ।**
**मुर्ध्नि बद्धाञ्जलिपुटो मार्कण्डेयो महातपाः ॥ ३-१०-४५**

इदमेव ऐकात्म्यं विस्तरेण वक्तुं प्रश्नमवतारयति - तत इत्यादि ||

**नामगोत्रे ततः श्रुत्वा दीर्घायुर्लोकपुजितः ।**
**अथाकरोन्नमस्कारं प्रणतः शिरसा प्रभुम् ॥ ३-१०-४६**

मार्कण्डेय उवाच

**इच्छेऽहं तत्त्वतो मायामिमां ज्ञातुं तवानघ ।**
**यदेकार्णवमध्यस्थः शेषे त्वं बालरूपवान् ॥ ३-१०-४७**

**किंसंज्ञः कश्च भगवाँन्लोके विज्ञायसेऽनघ ।**
**तर्कये त्वां महाभूतं न भूतमिह तिष्ठति ॥ ३-१०-४८**

श्रीभगवानुवाच

अहं नारायणो ब्रह्मा संभवः सर्वदेहिनाम् ।
सर्वभूतोद्भवकरः सर्वभूतविनाशनः ॥ ३-१०-४९

मायायास्तत्वं श्रीभगवानुवाच - अहं नारायण इति ।यो अयमस्मत्प्रलयविषयः नारायणो नाराख्य कृत्स्नप्रपञ्च लयाधिष्ठानं उपादिस्पर्शशून्यं तदेव मायया अन्यथा भाति।तत्वं तज्ज्ञानान् मायानिवृत्तिस्तदज्ञानाद् रज्जूरगवद्ब्रह्मादिरूपेण मायैव भातीत्यर्थः।

अहमैन्द्रे पदे शक्र ऋतुनामपि वत्सरः ।
अहं युगे युगाक्षश्च युगस्यावर्त एव च ॥ ३-१०-५०

ऐकात्म्यग्रहणासमर्थानाम् उपास्त्यर्थं विभूतिराह - अहमैन्द्रे पदे इत्यादिना सार्धत्रयेण ।

अहं सर्वाणि सत्त्वानि दैवतान्यखिलानि च ।
भूजगानामहं शेषस्तार्क्ष्योऽहं सर्वपक्षिणाम् ॥ ३-१०-५१

अहं सहस्रशीर्षा ध्यौर्यः पदैरभिसंवृतः ।
आदित्यो यज्ञपुरुषो देवो यज्ञमयो मखः ।

अहमग्निर्हव्यवाहो यादसां पतिरव्ययः ॥ ३-१०-५२
यत्पृथिव्यां द्विजेन्द्राणां तपसा भावितात्मनाम् ।

बहुजन्मनिरुद्धात्मा ब्राह्मणो यतिरुच्यते ॥ ३-१०-५३
ज्ञानवान् दृष्टविश्वात्मा योगिनां योगवित्तमः ।

यदिति।तपसा स्वधर्मानुष्ठानेन भवितात्मनां शुद्धचेतसां मध्ये बहुषु जन्मसु निरुद्धात्मा

निरुद्धचेता ब्राह्मणो ब्रह्मवित् यतिः संन्यासी । यदुच्यते *ब्रह्मविद्ब्रह्मैव भवति* इति शास्त्रे यद्रूपत्वेनोच्यते तद्ब्रह्माहं मायया अनारोपितं रूपमहमिति पुर्वेण संबन्धः ॥

कृतान्तः सर्वभूतानां विश्वेषां कालसंज्ञितः ॥ ३-१०-५४
अहं कर्म क्रिया जीवः सर्वेषां धर्मदर्शनः ।

निष्क्रियः सर्वभूतेषु स्वात्मज्योतिः सनातनः ३-१०-५५
प्रधानं पुरुषो देवोऽहमाद्यस्त्वक्षयोऽव्ययः

अहं धर्मस्तपश्चाहं सर्वाश्रमनिवासिनाम् ॥ ३-१०-५६
अहं हयशिरो देवः क्षीरोदे यो महार्णवे ।

ऋतं सत्यं च परममहमेकः प्रजापतिः ॥ ३-१०-५७
अहं सांख्यमहं योगमहं तत्परमं पदम् ।

ऋतं श्रुत्युक्तानुष्ठानं कर्मादीन् सत्यं तत्प्राप्यं ब्रह्मः ॥

अहमिज्यो भवश्चाहमहं विद्याधिपः स्मृतः ॥ ३-१०-५८
अहं ज्योतिरहं वायुरहं भूमिरहं नभः ।

सांख्यं वेदान्तविचारः । योगश्चित्तवृत्तिनिरोधः । विद्याधिपो विद्याप्रदाता ॥

अहमापः समुद्राश्च नक्षत्राणि दिशो दश ।
अहं वर्षमहं सोमः पर्जन्योऽहमहं रविः ॥ ३-१०-५९

क्षीरोदः सागरश्चाहं समुद्रो वडवामुखः ।
वह्निः संवर्तको भूत्वा पिबंस्तोयमहं रविः ॥ ३-१०-६०

सागरो लवणोदकः | समुद्रः स्वादुदकादिः ||

**अहं पुराणं परमं तथैवेह परायणम् ।**
**भविष्यं चैव सर्वत्र भविष्ये सर्वसंभवः ॥ ३-१०-६१**

**यत्किञ्चित्पश्यसे चैव यच्छृणोषि च किञ्चन ।**
**यच्चानुभवसे लोके तत्सर्वं मामकं स्मृतम् ॥ ३-१०-६२**

तत्सर्वं मामकं स्मृतं स्वरूपमिति शेषः ||

**विश्वं सृष्टं मया पूर्वं सृजेयं चाद्य पश्य माम् ।**
**युगे युगे च स्रक्ष्यामि मार्कण्डेयाखिलं जगत् ॥ ३-१०-६३**

**तदेतदखिलं सर्वं मार्कण्डेयावधारय ।**
**शुश्रूषुर्मम धर्मेप्सुः कुक्षौ चर सुखी भव ॥ ३-१०-६४**

मम धर्मेप्सुः ऐश्वर्येप्सुः कुक्षौ चर निर्विकल्पं समाधिमनुतिष्ठ | सुखी संसारदुःखशून्यः ||

**मम ब्रह्मा शरीरस्थो देवाश्च ऋषिभिः सह ।**
**व्यक्तमव्यक्तयोगं मामवगच्छापराजितम् ॥ ३-१०-६५**

ब्रह्मादीन् प्रति स्वस्य तटस्थकारणत्वं मा भूत् किंतु अभिन्ननिमित्तोपाधनत्वरूपं कारणत्वमेवेत्याह - मम ब्रह्मा शरीरस्थ इति | कनककुण्डलवत् सर्वमिदं मय्येवोतं प्रोतं चेति भावः ||

**अहमेकाक्षरो मन्त्रः त्र्यक्षरश्चैव सर्वशः ।**
**त्रिपदश्चैव परमस्त्रिवर्गार्थनिदर्शनः ॥ ३-१०-६६**

एकाक्षरः अकारः | *अकारो वै सर्वा वाक्* इति श्रुतेः | अक्षरः प्रणवः त्रिपदा गायत्री

वैशम्पायन उवाच

**एवमेतत्पुराणेषु वेदान्ते च महामुनिः ।**
**वक्त्रे व्याहृतवानाशु मार्कण्डेयं महामुनिम् ॥ ३-१०-६७**

सर्ववेदान्तप्रसिद्धं महामुनिर्व्यासो बबन्धेत्याह वैशंपायन - एवमिति | आहृतवान् आनीतवान् मार्कण्डेयं मुखे प्रक्षेप्तुमिति शेषः ||

**प्रवेशयामास ततो जठरं विश्वरूपधृक् ।**
**ततो भगवतः कुक्षिं प्रविष्टो मुनिसत्तमः ।**
**रराम सुखमासाद्य शुश्रूषुर्हंसमव्ययम् ॥ ३-१०-६८**

हंसं परमात्मानं शुश्रूषुः निर्विकल्पकेन समाधिना आराधयितुमिच्छुः ||

**तदक्षरं विविधमथाश्रितो वपुर्-**
**महार्णवे व्यपगतचन्द्रभास्करे ।**
**शनैश्चरन् प्रभुरपि हंससंज्ञितोऽ-**
**सृजज्जगद्विसृजति कालपर्यये ॥ ३-१०-६९**

अध्यायार्थमुपसंहरमिति - तदक्षरमिति || हंससंज्ञितस्थदक्षरम् अविनाशी ब्रह्म कीदृशः विविधं वपुराश्रितः सन्नपि महार्णवे चिन्मात्रावस्थायां चन्द्रभास्कर शब्दित तत्कारणमनश्चक्षुर्वर्जिते कार्यकारणपरपञ्चशुन्ये इत्यर्थः |शनैः भूमिजयक्रमेण चरन् कालपर्यये अविद्यालेशवशात् समाधिसुखविच्छेदकाले जगदसृजत् महाभूतमयं विसृजति विविधभौतिकं सृजति |

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि पौष्करे मार्कण्डेयदर्शने दशमोऽध्यायः

इति महाभारते खिलेषु हरिवंशे भविष्यपर्वणि टीकायां दशमोऽध्यायः

Harivamsha Maha Puranam - Part 3 - Bhavishya Parva
iitranslated by G. Scaufelberger, scaufel@wanadoo.fr August 22, 2008
Proof-read by K S Ramacandran, ramacandran_ksr@yahoo.ca
Electronic version of Nilakantha commentary by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared using latex-sanskrit package of Charles Wikner

If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com